# Lesson 32: Bhagavad Gītā Pages 542 - 543

38. अर्जुनः उवाच । त्वम् आदि-देवः पुरुषः पुराणः, त्वम् अस्य विश्वस्य परं निधानम् । वेत्ता वेद्यं च परं च धाम असि, विश्वम् त्वया ततम् अनन्तरूप ।

39. त्वं वायुः यमः अग्निः वरुणः शशांकः प्रजापतिः प्रपितामहः च । नमः नमः ते सहस्रकृत्वः अस्तु, नमः नमः ते पनः च भूयः अपि ।

40. नमः ते पुरस्तात् अथ पृष्ठतः नमः अस्तु सर्वतः एव सर्व । त्वं अनन्त-वीर्य-अमित-विक्रमः सर्वं समाप्नोषि ततः सर्वः असि ।

43. त्वम् अस्य चर-अचरस्य लोकस्य पिता असि, पूज्यः च गरीयान् गुरुः । त्वत्-समः न अस्ति, अभ्यधिकः अन्यः कुतः लोक-त्रये अपि, अप्रतिम-प्रभाव ।

44. तस्मात् प्रणम्य कायं प्रणिधाय त्वाम् ईड्यम् ईशं अहं प्रसादये । पिता इव पुत्रस्य, सखा इव सख्युः, प्रियः प्रियायाः सोढुम् अर्हसि, देव ।

45. अदृष्ट-पूर्वं दृष्ट्वा हृषितः अस्मि, मे मनः च भयेन प्रव्यथितम् । तद् एव रूपं मे दर्शय, प्रसीद, देव देवेश जगत्-निवास ।

46. त्वाम् तथा एव किरीटिनं गदिनं चक्र-हस्तं द्रष्टुम् अहम् इच्छामि । तेन एव चतुर्भुजेन रूपेण भव सहस्र-बाहो विश्व-मूर्ते ।

47. श्रीभगवान् उवाच । अर्जुन, इदं परं रूपम् प्रसन्नेन मया आत्म-योगात् तव दर्शितम्, तेजोमयं विश्वम् अनन्तम् आद्यं मे यद् त्वद्-अन्येन न दृष्ट-पूर्वम् ।

48. न वेद-यज्ञ-अध्ययनैः न दानेन न च क्रियाभिः उग्रैः तपोभिः त्वद्-अन्येन नृ-लोके अहम् एवं-रूपः द्रष्टुं शक्यः, कुरु-प्रवीर ।

49. मम इदम् ईदृक् घोरं रूपं दृष्ट्वा ते व्यथा मा (अस्तु), विमूढ-भावः च मा (अस्तु) । त्वं व्यपेत-भीः प्रीत-मनाः तद् एव मे इदं रूपं पुनः प्रपश्य ।

50. सञ्जयः उवाच । इति वासुदेवः अर्जुनं तथा उक्त्वा स्वकं रूपं भूयः दर्शयामास । महात्मा च सौम्य-वपुः पुनः भूत्वा भीतम् एनम् आश्वासयामास ।

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, aor = aorist, ger = gerund, inf = infinitive, denom = denominative, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva

51. अर्जुनः उवाच । जनार्दन, त्व इदं मानुषं सौम्यं रूपं दृष्ट्वा इदानीं सचेताः संवृत्तः प्रकृतिं गतः अस्मि ।

52. श्रीभगवान् उवाच । मम इदं सु-दुर्-दर्शं रूपं यद् दृष्टवान् असि, देवाः अपि अस्य रूपस्य नित्यं दर्शन-कांक्षिणः ।

53. न वेदैः न तपसा न दानेन इज्यया च अहम् एवंविधः द्रष्टुं शक्यः, यथा मां दृष्टवान् असि ।

54. अर्जुन, अन्यया तु भक्त्या अहम् एवंविधः ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च शक्यः, परंतप ।

55. यः मद्-कर्म-कृत् मद्-परमः मद्-भक्तः संग-वर्जितः सर्व-भूतेषु निर्-वैरः सः माम् एति पाण्डव ।